UNIVERSITY OF DELHI



INSTITUTE OF POST GRADUATE (E) STUDIES LIARARY

EPS

INSTITUTE OF POST GRADUATE (E) STUDIES

LIBRARY

Cl. No. 015 : gx 350 N HO

Ac. No. E 8509

This book should be returned on or before the last date stamped below. An overdue charge of 5 Paise/25 Paise (Text-books) will be collected for each day the book is kept overtime.

THE

VṚITTIVĀRTIKA

OF

APPAYA DĪKṢITA

EDITED BY

PAṆḌIT ŚIVADATTA

AND

KĀŚINĀTH PĀṆḌURANG PARAB

Third Edition

REVISED BY

NĀRĀYAṆ RĀM ĀCHĀRYA "KĀVYATĪRTHA"

PUBLISHED BY

SATYABHĀMĀBĀI PĀṆḌURAṄG,

FOR THE NIRṆAYA SĀGAR PRESS,

BOMBAY

1940

Price 3 Annas

[All rights reserved by the publisher.]

Publisher:-Satyabhamabai Pandurang, } Nirnaya-Sagar Press,
Printer:-Ramchandra Yesu Shedge, } 26-28, Kolbhat Street, Bombay.

काव्यमाला. ३६.

श्रीमदप्पयदीक्षितप्रणीतं

वृत्तिवार्तिकम् ।

जयपुरमहाराजाश्रितेन महामहोपाध्यायपण्डितदुर्गाप्रसाददारक-
केदारनाथकृपाङ्गीकृतशोधनकर्मणा शिवदत्तशर्मणा,
मुम्बापुरवासिपरबोपाह्वपाण्डुरङ्गात्मजकाशीनाथ-
शर्मणा च पूर्वसंशोधितस्यास्य

तृतीयं संस्करणम्

नारायण राम आचार्य "काव्यतीर्थ"

इत्यनेन संस्कृतम् ।

मुम्बय्यां

सत्यभामाबाई पाण्डुरङ्ग इत्येताभिः,

निर्णयसागरमुद्रणयन्त्रालये मुद्रयित्वा तस्यैव च कृते प्राकाश्यं नीतम् ।

शाकः १८६२. खिस्ताब्दः १९४०

मूल्यं २ आणकाः ।

काव्यमाला ।

श्रीमदप्पदीक्षितविरचितं
वृत्तिवार्तिकम् ।

विश्वं प्रकाशयन्ती व्यापारैर्लक्षणाभिधाध्वननैः ।
नयनैरिव हरमूर्तिर्विबुधोपास्या सरस्वती जयति ॥

वृत्तयः काव्यसरणावलंकारप्रबन्धृभिः ।
अभिधा लक्षणा व्यक्तिरिति तिस्रो निरूपिताः ।
तत्र क्वचित्क्वचिद्वृद्धैर्विशेषानस्फुटीकृतान् ।
निष्टङ्कयितुमस्माभिः क्रियते वृत्तिवार्तिकम् ॥

तत्र—

शक्त्या प्रतिपादकत्वमभिधा ।

सा त्रिधा—रूढिर्योगो योगरूढिश्च । [तत्र—]

अखण्डशक्तिमात्रेणैकार्थप्रतिपादकत्वं रूढिः ।

तन्मात्रेण प्रतिपादकत्वं च—अवयवार्थाप्रतिभासाद्वा, तत्प्रतिभासेऽपि तस्य प्रतिपाद्ये बाधाद्वा । यथा—

'यत्ते पदाम्बुरुहमम्बुरुहासनेड्यं
धन्याः प्रपद्य सकृदीश भवन्ति मुक्ताः[1] ।
नित्यं तदेव भजतामतिमुक्तलक्ष्मी-
र्युक्तैव देव मणिनूपुरमौक्तिकानाम् ॥[2]'

---

१. मोक्षभाजः. २. मोक्षभाजो मौक्तिकानि च.

अत्र 'मणिनूपुरा'दिशब्दानां नावयवार्थप्रतिभासः, अतिमुक्तशब्दस्यावयवार्थप्रतिभासेऽपि वासन्तीलक्षणे अप्रतिपाद्ये तस्य बाध इत्येषां रूढिः । यद्यपि 'अतिमुक्तलक्ष्मीर्वासन्तीमुकुलशोभैव मुक्तातिशायिनी संपद्' इत्यभेदाध्यवसायार्थमतिमुक्तशब्दस्यावयवार्थोऽपि विवक्षितः, तथापि तस्य वासन्तीगतत्वेनाप्रतिपादनात्तत्र रूढिरेव । एतदव्याप्तिवारणेनैव लक्षणेऽप्येकपदमर्थवत् ।

अवयवशक्तिमात्रसापेक्षं पदस्यैकार्थप्रतिपादकत्वं योगः ।

यथा—

'ऊर्ध्वं विरिञ्चिभवनात्तव नाभिपद्मा-
द्रोमावलीपदजुषस्तमसः परस्तात् ।
मुक्तौघमण्डितमुरःस्थलमुन्मयूखं
पश्यामि देव परमं पदमेव साक्षात् ॥'

अत्र 'विरिञ्चिभवन-नाभिपद्म-रोमावली'त्यादिशब्दानां योगः ।

अवयवशक्तिमात्रेण प्रतिपादकत्वमपि—समुदायार्थाप्रतिभासाद्वा, तत्प्रतिभासेऽपि तस्यावयवशक्तिप्रतिपाद्येऽ[न]न्वयाद्वेति द्वेधा । तत्राद्यमुदाहृतम् । द्वितीयं यथा—

'अस्तु त्रयीमय तनुस्तव लम्बनाली-
रत्नैस्तथापि परिभूयत एव भानुः ।
सोढः सतां बत निशान्तमुपागतानां
मेवं तिरस्कृतिकृदीश्वर कः सुवृत्तैः ॥'

अत्र 'निशान्त'शब्दस्य निकेतनरूपसमुदायार्थप्रतिभासेऽपि 'निशान्तं त्रियामावसानमुपगतानां सतां नक्षत्राणां तिरस्कृतिकृदन्तर्हितिकृ

१. 'रूढिर्योगापहारिणी' इत्युक्तेः. २. मौक्तिकानि. ३. रूढिलक्षणे.

एवं गृहं प्राप्तानां सत्पुरुषाणां पराभवकृत्' इत्यभेदाध्यवसायार्थं तस्य विवक्षितत्वेऽपि त्रियामावसाने योग एव,

अवयवसमुदायोभयशक्तिसापेक्षमेकार्थप्रतिपादकत्वं योगरूढिः ।

यथा—

'पक्षद्वयकृशिमपोषविभाव्यमान-
चान्द्रायणव्रतनिषेवण एव नित्यम् ।
कुर्वन्प्रदक्षिणमुपेन्द्र सुरालयं ते
लिप्सुर्मुखाब्जरुचिमेष तपस्यतीन्दुः ॥'

अत्र 'सुरालय'शब्दस्य 'सुराणाम् आलयः' इत्यवयवशक्त्या समुदायशक्त्या च कनकाचले योगरूढिः । न च अस्य शब्दस्य कनकाचले रूढिरेव केवलास्तु, मा भूद्योगरूढिः, उदाहृतश्लोके तपश्चर्योत्प्रेक्षायाः प्रदक्षिणीक्रियमाणस्य कनकाचलस्यावयवशक्त्युपस्थाप्यदेवालयाभेदाध्यवसायेनापि निर्वाहात् इति वाच्यम् । तत्रैवावयवार्थसंभवेऽन्याभेदाध्यवसायरूपपरमुखनिरीक्षणायोगात् । तत्रैव यौगिकार्थप्रतिभासस्य सर्वसाक्षिकत्वाच्च । न च एवं सति देवागारसाधारणकूटावयवशक्तिमात्रेण कनकाचलेऽपि प्रवृत्त्युपपत्तेर्न तत्र समुदायशक्तिः कल्पनीया इत्यपि शङ्क्यम् । 'रत्नसानुः सुरालयः' इत्याद्यभिधानकोशस्मृतिपरम्परया विशिष्य तस्य तत्र समुदायशक्तेरपि सिद्धेः । अन्यथा देवतागार इव तत्र विशिष्यानुशासनानपेक्षणे तद्वैयर्थ्यापत्तेः । अत एवैतादृशपदे सति पुनः समुदायार्थवाचकपदप्रयोगे पुनरुक्तदोषोल्लासः । यथा—

---

१. 'समुदाहृत' ख-ग.

'भद्राय भवतु भवतां भगवान्भजमानदैन्यतिमिररविः ।
दिवसारम्भविकस्वरनीरजनलिनश्रिभिरामतरनयनः ॥'

यत्र योगरूढिमतोऽपि पदस्यावयवार्थशक्तिमूलप्रतीयमानार्थगर्भीकारेण तत्रैव विश्रान्तिः, तत्र समुदायार्थवाचकपदान्तरप्रयोगेऽपि न पुनरुक्तदोषोल्लासः । यथा—

'उद्यन्मृगाङ्करुचिकन्दलकोमलाना-
मुन्निद्रशोणनलिनोदरसोदराणाम् ।
प्राप्तुं तवाधररुचामवलोकनेन
नालं सहस्रनयनः स वृषापि तृप्तिम् ॥'

अत्र 'सहस्रनयन'शब्दस्यावयवार्थशक्त्यावलोकनप्रकर्षसंभवप्रतीतेस्तत्रैव विश्रान्तिरिति पुनरिन्द्रवाचिपदप्रयोगः । यथा वा—

'तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा ।
कुर्या हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये ॥'

अत्र 'पिनाकपाणि'शब्दस्य शिवनाम्नोऽवयवार्थशक्त्या तदायुधसारत्वप्रतीतेस्तत्रैव तस्य विश्रान्तिरिति पुनः 'हर'पदप्रयोगः । ननु—'कुसुमायुधोऽपि' इत्यत्रावयवार्थशक्त्या तदायुधा(ध)सारत्वप्रतीतावपि कामवाचिपदान्तरं नोपात्तम् इति चेत्, न । तत्राप्युत्तमपुरुषाक्षिप्ताहंपदस्य विशेष्यवाचिनः सत्त्वादिति साहित्यचिन्तामणिकारः । वस्तुतस्तु—नायं नियमः, यत् 'अवयवार्थशक्तिमूलप्रतीयमानार्थविवक्षायां समुदायार्थवाचिपदान्तरं प्रयोक्तव्यम्' इति, किंत्वयमपि प्रकारोऽस्तीत्युदाहृतम् । तदप्रयोगे यथा—

'मन्ये निजस्खलनदोषमवर्जनीय-
मन्यस्य मूर्ध्नि विनिवेश्य बहिर्बुभूषुः ।

आविश्य देव रसनानि महाकवीनां
देवी गिरामपि तव स्तवमातनोति ॥'

अत्र 'वागीश्वरीपदादवयवार्थशक्त्या प्रतीयमानस्य विद्याविषये स्खालित्यापवादमितरवत्सरस्वती न सहते' इत्यर्थस्य वाच्यस्योपस्कारकतया विवक्षितत्वेऽपि 'वाचामधिदेवतापि यत्र भगवतः स्तोत्रे न पर्याप्तं सामर्थ्यं बिभर्ति, तत्र कथमन्येऽधिकुर्युः' इत्यर्थापत्त्यलंकारध्वननसत्त्वेऽपि पृथक्सरस्वतीवाचकपदप्रयोगः । एकावलीकृतापि विशेष्यस्य साभिप्रायत्वं परिकरालंकारलक्षणमभिधाय,—

'नरसिंह महीपाल कीर्तिस्त्रिपथगा तव ।
न कस्य भवति श्लाघ्या पुनाना भुवनत्रयम् ॥'

इति तदुदाहरणे भुवनत्रयपवित्रीकरणोपपत्त्यभिप्रायगर्भं त्रिपथगापदं विशेष्यमेव प्रयुञ्जानेन तत्प्रयोगानियमो दर्शितः । तस्मात् योगरूढिमतः पदस्य यौगिकार्थशक्तिमूलप्रतीयमानार्थगर्भाकारेण समुदायार्थवाचिपदप्रयोगाप्रयोगाभ्यां द्वैविध्यमेवादृतम्, न पुनस्तत्प्रयोगनियमः ।

क्वचिद्योगरूढिमतः पदस्य विषयविशेषेऽवयवार्थानन्वयात्समुदायार्थमात्रे विश्रान्तिः । यथा—

'उल्लासयत्युदरबन्धनिबद्धदिव्य-
शोणाश्मरश्मिकलिकावलिरच्युतैषा ।
आगाम्यनेकशतकल्पविधातृगर्भ-
नाभ्युद्गताम्बुरुहकुड्मलपङ्क्तिशोभाम् ॥'

अत्र 'अम्बुरुह'पदस्य भगवन्नाभिपद्मेऽवयवार्थानन्वयाद्रूढिरेव ।

---

१. '–योगे नि–' ख.

क्वचित्तु समुदायार्थानन्वयादवयवार्थमात्रे तत्र विश्रान्तिः । यथा—

'कह्लारकैरवमुखेष्वपि पङ्कजेषु
लोकेश यत्कमलमेव तथा प्रसिद्धम् ।
मन्येऽभिजात भवदास्यतुलास्य नेति
मर्मप्रकाशनमिदं विधिनैव कृप्तम् ॥'[1]

अत्र 'पङ्कज'पदस्य कुमुदकह्लारादिषु समुदायार्थानन्वयाद्योग एव । नैयायिकास्तु—पङ्कजादिशब्दरूपैकपदोपादानरूपान्तरङ्गप्रत्यासत्त्या नाभिकमलकुमुदाद्यन्वयात्प्रागेव पङ्कजनिकर्तृत्ववैशिष्ट्येनोपस्थितस्य पद्मत्वस्य, पद्माश्रयत्वेनोपस्थितस्य पङ्कजनिकर्तृत्वस्य च नाभिकमलकुमुदाद्यन्वये नाकाङ्क्षा; न चाविशिष्टस्य तदन्वयविषयिणी शाब्दधीः, इति तदन्वयार्थं स्वतन्त्रपद्मत्वपङ्कजनिकर्तृत्वोपस्थितये पङ्कजादिपदस्य लक्षणैवाभ्युपगन्तव्या, न तु रूढियोगौ वा । न च—प्रथमं योगरूढिभ्यां स्वार्थोपस्थाने पश्चान्नाभिकमलाद्यन्वयार्थं विरुद्धवृत्तिमूकीभावे तदितरवृत्त्यैव स्वतन्त्रपद्मत्वाद्युपस्थितेराकाङ्क्षादिसंभवान्न तवर्थमिह लक्षणा—इति वाच्यम्, केवलरूढ्यादिना स्वतन्त्रपद्मत्वाद्युपस्थित्यर्थं शब्दस्य पुनरनुसंधानकल्पनागौरवापत्तेः । लक्षणापक्षे तु नायं दोषः, पङ्कजनिकर्तृत्वसंवलितपद्मत्वरूपविशिष्टोपस्थितेर्विशेषणविशेष्यान्यतरोपस्थितिलक्षणद्वारत्वेन द्वारे सति द्वारिणः पुनरनपेक्षणात् । न च—शक्योपस्थितिर्लक्षणायामिव शक्योपस्थित्यन्तरेऽपि द्वारम् । येन रूढ्यादिना स्वतन्त्रपद्मत्वोपस्थितावपि पुनरनुसंधानं न कल्प्येत—इत्याहुः ।

इत्थमभिधा त्रिविधा निरूपिता । सा चानेकशक्तिकस्य शब्दस्य संयोगाद्यैर्नियम्यते । तथाहुः—

---

१. 'रूपयाऽन्तर' ख-ग.

'संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥' इति ।

अर्थः=प्रयोजनम् । प्रकरणं च=वक्तृश्रोतृबुद्धिस्थता । लिङ्गं=प्रयुक्तनानार्थपदवाच्यान्तरव्यावृत्तो धर्मः । शब्दस्यान्यस्य संनिधिः=नानार्थपदैकवाच्यसंसर्ग्यर्थान्तरवाचिपदसमभिव्याहारः । सामर्थ्यं=कारणत्वम् । औचिती=अर्हता । व्यक्तिः स्त्रीपुंनपुंसकम् । शेषं प्रसिद्धम् । तत्र—'शङ्खचक्रधरो हरिः' इत्यत्र शङ्खचक्रसंयोगेन हरिशब्दस्य भगवत्यभिधा नियम्यते । 'अशङ्खचक्रो हरिः' इत्यत्र तद्विप्रयोगेन । 'रामलक्ष्मणौ' इत्यत्र रामपदस्य लक्ष्मणसाहचर्याद्रघुपुंगवे । 'छायातपौ' इत्यत्र च्छायाशब्दस्यातपेन सह सहानवस्थानविरोधादनातपे । 'रामरावणयोरिव' इत्यत्र रावणेन सह वध्यघातकभावविरोधाद्रामपदस्य रामचन्द्रे । यत्तु—'रामार्जुनपदयोर्वध्यघातकभावविरोधाद्भार्गवकार्तवीर्ययोरभिधा नियम्यते—इत्युदाहरणम्, तन्न । 'राम'पदस्य भार्गवेऽभिधानियमने सति तद्विरोधप्रतिसंधानेन 'अर्जुन'पदस्य कार्तवीर्येऽभिधानियमनम्, तस्मिंश्च सति तद्विरोधप्रतिसंधानेन 'राम'पदस्येति परस्पराश्रयापत्तेः । तस्मादन्यतरपदस्य व्यवस्थितार्थत्व एव स्मृततद्विरोधप्रतिसंधानान्नानार्थपदस्याभिधानियमनमिति प्रागुक्तमेवोदाहरणमनुसर्तव्यम् । इदं तु शब्दान्तरसंनिधेरुदाहरणं भविष्यति । 'हरिं मोक्षाय भजत' इत्यत्र मोक्षरूपेणार्थेन 'हरि'शब्दस्य भगवत्यभिधा नियम्यते । 'विवेश रामो दुर्धर्षं तापसाश्रममण्डलम्' इत्यत्र 'राम'पदस्य प्रकरणाद्रघुवीरे । 'कुपितो भूभृत्' इत्यत्र कोपलिङ्गेन पर्वतव्यावृत्तेन भूभृदित्यस्य राजनि । संयोगोदाह-

रणे प्रसिद्धिप्राचुर्यम्, शङ्खादेरिन्द्रादावर्थान्तरेऽपि संयोगाविरोधात् लिङ्गोदाहरणे तु सर्वथार्थान्तरव्यावृत्तिरिति भेदः। 'निषधं पश्य भूभृतम्' इत्यत्र जनपदविशेषसाधारणस्य 'निषध'पदस्य पर्वतवाचि'भूभृत्'-पदसंनिधानात्पर्वतविशेषे नियम्यते। भूभृत्पदस्य च राजसाधारणस्य पर्वतविशेषवाचिनिषधपदसंनिधिना पर्वते। न चान्योन्याश्रयः। न ह्यत्र समभिव्याहृतशब्देन तदर्थप्रतिपादनमभिधानियमनायापेक्ष्यते, किं तु स्वार्थेन गृहीतसंसर्गेऽर्थे व्युत्पन्नो यः शब्दः, तत्समभिव्याहारमात्रम्। तथा च यथा संबन्धिदर्शनात्संबन्ध्यन्तरस्मृतिस्थले गृहीतसंबन्धस्य संबन्धिनो दर्शनमात्रं संबन्ध्यन्तरस्मरणायापेक्ष्यते, न तु तद्दर्शनानन्तरं तत्संबन्धस्मरणमपीति नान्योन्याश्रयः, तथेहापि 'निषध-भूभृत्'पदयोरभिधानियमनाय गृहीतस्वस्वार्थव्युत्पत्तिक'भूभृन्निषध'शब्दसमभिव्याहारमात्रमपेक्ष्यत इति तत्तदर्थप्रतिपादनस्यानपेक्षणान्नान्योन्याश्रयः। नन्वेवं 'शङ्खचक्रधरो हरिः' इत्यादावपि 'शङ्खचक्रा'दिशब्दान्तरसंनिधिनैवाभिधानियमनं भविष्यतीति व्यर्थं पृथक्संयोगाद्युदाहरणम्—इति चेत्, मैवम्। तत्र शङ्खचक्रादिशब्दानां नियतार्थतया श्रवणमात्रादर्थप्रतिपादकत्वेन तत्प्रतिपादितार्थसंयोगादिभिरभिधानियमनसंभवात्। 'शब्दान्तरसंनिधिरपि तत्रास्ति' इति चेत्, अस्तु,—तथापि हरिशब्दाद्यभिधानियमनसमर्थे तदर्थसंयोगादिरूपसंनिहितसंबन्धेनान्तरङ्गे शङ्खचक्रादावुपस्थिते तत्रापि वाचकतया व्यवहितसंबन्धेन बहिरङ्गशब्दान्तरसंनिधिर्नोदाहरणत्वमर्हति। अतो यत्र 'निषधं पश्य भूभृतम्' इत्यादावुभयस्य नानार्थतया न कस्याप्यर्थस्य प्रथममुपस्थितिः, तत्रैव बहिरङ्गस्यापि तस्य नियामकत्वेनोदाहरणमिति न कश्चित्संकरः। यत्तु—नियतार्थशब्दसामानाधिकरण्यं शब्दान्तरसंनिधिः, तेन च 'देवस्य

त्रिपुरारातेः' इत्यत्र 'देव'शब्दस्य शंकरे नियमनम्, तत्र 'त्रिपुरारातिं'-शब्दस्य नियतार्थत्वात् इति, तदयुक्तम् । समभिव्याहृतशब्दस्य नियतार्थत्वे तत्प्रतिपादितलिङ्गादिनैव तन्नियमनात् । अन्यथा लिङ्गाद्युदाहरणेऽपि शब्दान्तरसंनिधेरेव नियामकत्वापत्तेः । न च 'सामानाधिकरण्ये शब्दान्तरसंनिधिः', वैयधिकरण्ये 'भूभृतः कोपः' इत्यादिरूपे 'लिङ्गादिकम्' इति भेदकथनम् । उभयत्र शब्दप्रतिपादितलिङ्गादेरेव नियामकत्वेनास्य भेदकथनस्य परिभाषामात्रत्वात् । 'व्यालो दानेन राजते' इत्यत्र 'व्याल-दान'पदयोरुभयोरप्यनियतार्थत्वेऽपि वैयधिकरण्येऽपि परस्परसमभिव्याहारेण दुष्टगजमदजलयोरभिधानियमनस्य सर्वानुभवसिद्धत्वेनावश्यसंग्राह्यत्वात्तदसंग्रहेण लक्षणकथनस्यात्यन्तायुक्तत्वाच्च । तस्मादस्मदुक्तैव शब्दान्तरसंनिधेः प्रक्रियादरणीया । 'मधुना मत्तः कोकिलः' इत्यत्र कोकिलमदकारणत्वरूपेण सामर्थ्येन वसन्ते 'मधु'शब्दस्याभिधा नियम्यते । 'भजत हरिं भवतापखिन्नाः' इत्यत्र भवतापहरणौचित्येन 'हरि'पदस्य लक्ष्मीरमणे । अर्थोदाहरणे चतुर्थ्या कार्यत्वनिर्देशः, सामर्थ्योदाहरणे तृतीयया करणत्वनिर्देशः, औचित्योदाहरणे तदुभयानिर्देशेऽपि योग्यतामात्रेण समभिव्याहारलभ्यकार्यकारणभावावगमः, इति भेदः । 'क्षीरार्णवे हरिः शेते' इत्यत्र देशेन, 'प्रलये तिष्ठति हरिः' इत्यत्र कालेन च गरुडध्वजे 'हरि'पद(दं)स्य नियम्यते । 'मित्रो भाति' इत्यत्र पुंव्यक्त्या तपने सुहृद्वाचिनो नपुंसकत्वात् । 'तिस्र एव सायाह्नस्योपसदः, द्वादशाहीनस्य' इति श्रुतौ 'अहीन'पदस्य मध्योदात्तस्वरेणाहर्गणसाध्यसुत्याके द्वादशाहाख्यक्रतुविशेषे, 'अह्नः खः क्रतौ' इत्यनुशासनात् । हीनो न भवति' इति नञ्समासे सत्यहीनपदस्याद्युदात्तत्वात् । आदिशब्देनाभिनयोपदेशौ गृह्येते । अभि-

नयः=विवक्षितार्थाकृतिप्रदर्शको हस्तादिव्यापारः । उपदेशः=विवक्षितार्थस्य शृङ्गग्राहिकया निर्देशः ।

'परारिसंदर्शितसंनिवेशौ मरुत्पराभूतसरोजकोशौ ।
इमावियन्तौ पुनरेषमस्ते कुचौ कियन्तौ परतो भवेताम् ॥'

इत्यत्र तत्कालस्तनपरिमाणप्रदर्शकहस्तव्यापारेण 'इयत्' पदस्य परिमाणविशेषे,—

'इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम् ॥'

इत्यत्र 'इतः' इति स्वात्मनिर्देशेन तस्य वक्तरि परमेष्ठिन्यभिधा नियम्यते ।

यत्र त्वनेकशक्तस्य शब्दस्याभिधानियामकमनेकत्राविशिष्टमर्थे, तत्र नान्यतरस्मिन्नभिधा नियम्यते । यथा—

'येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो
यश्चोद्वृत्तभुजङ्गहारवलयोगङ्गां च योऽधारयत् ।
यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामामराः
पायात्स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः ॥'

अत्र शिव-केशवयोरपि स्तुत्यतया प्रकरणमविशिष्टम् । अतः—'ध्वस्तमनोभवेन=नाशितमन्मथेन, बलिजित्कायः=विष्णोर्विग्रहः, पुरेष्वस्त्रतां नीतः, यश्चोद्वृत्तशेषवासुकिप्रभृतिनागराजसंपादितहारवलयकृत्यः, यश्च गङ्गामधारयत्, यस्य शिरः शशिमदाहुरमराः स्तुत्यं नाम च हर इत्याहुः, अन्धकासुरक्षयकरः, स उमाधवस्त्वां सर्वदा पायात्' इति, 'अभवेन निःसंसारेण येन अनः शकटं ध्वस्तम्, येन च बलिजित्स्वस्य

१. 'मनेकत्र प्रविष्ट' क.

कायः पुरामृतमथने स्त्रीत्वं नीतः, यश्चोद्वृत्तं भुजङ्गं कालियं हतवान् रवे शब्दब्रह्मणि लयस्तादूप्यासक्तिरस्येति रवलयः, उद्वृत्तभुजङ्गान् हतवदारवलयं चक्रमस्येत्येकं पदं वा, अगं गोवर्धनं गां वराहावतारेण भूमिं च योऽधारयत्, यस्य स्तुत्यं नाम शशिमच्छिरोहर इत्याहुः शशिनं मक्षाति यो राहुस्तच्छिरोहर इति, अन्धकानां राज्ञां क्षयकरो निवासकृत्, सर्वदो माधवस्त्वां पायात्' इति चार्थद्वयेऽप्यभिधैव व्यापारः । अत एवात्र श्लेषोऽलंकारः ।

ननु च यत्रानेकत्र प्रकरणाद्यविशिष्टम् । तत्र भवत्वनेकत्राप्यभिधाव्यापारः । यत्र प्रकरणस्य क्वचिदर्थेऽवस्थितत्वेऽप्यप्राकरणिकं शक्यान्तरं प्रतीयते, तत्र का गतिः ? यथा—

'असावुदयमारूढः कान्तिमान् रक्तमण्डलः ।
राजा हरति लोकस्य हृदयं मृदुभिः करैः ॥'

इति चन्द्रोदयवर्णनप्रस्तावे । अत्र ह्यप्राकरणिको भूपतिरभ्युदयादिविशिष्टः प्रतीयते ।

अत्र प्राञ्चः—'तत्र शब्दशक्तिमूलो व्यञ्जनाव्यापार एव शरणम्, गत्यन्तराभावात् । न हि तस्य तत्राभिधा संभवति, तस्याः प्रकरणेन नियन्त्रितत्वात् । नापि लक्षणा, मुख्यार्थबाधाद्यभावात् । न चाभिधाया इव व्यञ्जनस्यापि प्रकरणेन नियन्त्रणे तेनापि न तन्निर्वाह इति वाच्यम्, तस्य धर्मिग्राहकमानेन तदनियम्यतयैव सिद्धेः । अत एव काव्यान्तर्निविष्टस्य[1] प्राकरणिकक्विचिदर्थनियताभिधाव्यापारस्याप्यसभ्यपदार्थान्तरप्रत्ययहेतोः पदस्य हेयत्वम् । अन्यथा तत्राभिधाया इव व्यञ्जनव्यापारस्यापि प्रकरणेन नियन्त्रणेऽसभ्यार्थान्तरप्रत्ययासंभवात् 'यस्याननं

१. 'काव्यान्तरनिविष्टस्य' ख.

योनिरुदारवाचाम्' इत्यादावश्लीलदोषो न स्यात् । तस्मात्संयोगादिभिरभिधाशृङ्खलिता यत्र कुण्ठतामेति, अर्थान्तरावगमने व्यञ्जनमेव क्षमं तत्र—' इति ।

वयं तु ब्रूमः—'असावुदयमारूढः—' इत्यादौ प्राकरणिकेऽर्थे प्राकरणिकवदप्राकरणिकेऽपि 'राजकरमण्डला'दिशब्दानां परस्परान्वययोग्यनृपतितद्वाह्यधनदेशादिवाचकानां समभिव्याहाररूपमभिधानियामकमस्तीत्यर्थद्वयस्यापि प्राकरणिकत्व इव प्राकरणिकाप्राकरणिकरूपत्वेऽप्युभयत्राभिधैव व्यापारः, यथोक्तसमभिव्याहारस्यापि शब्दान्तरसंनिधिरूपत्वेन प्रकरणवदभिधानियामकत्वात् । यैस्तु शब्दान्तरसंनिधिरन्यथा निरुच्यते, तैरपि यथोक्तसमभिव्याहारेण नानार्थशब्देभ्योऽर्थप्रत्ययस्य सर्वसिद्धत्वेन तस्य तद्भेदेनापि नियामकत्वमास्थेयमेव । वस्तुतोऽयमेव शब्दान्तरसंनिधिरित्यप्युक्तम् । न चाप्राकरणिके उक्तरूपशब्दान्तरसंनिधिमात्रम्, प्राकरणिके तच्च प्रकरणं चेति नियामकाधिक्यात्तत्रैवाभिधा स्यादिति वाच्यम्, प्रकरणादीनामभिधानियामकत्वं हि नानार्थशब्दजन्यशक्यस्मृतौ तेषामन्यतमकारणत्वम् । यथोक्तम्—'शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः' इति । तथा च तेषु कस्यचिदपि समवधाने स्मृतिसामग्री पुष्कलैवेति किं तद्बाहुल्येन?

यत्रैकमेव पदं नानार्थमप्राकरणिकेऽपि तात्पर्यवत् । यथा—

'करोति कंसादिमहीभृतां वधाज्जनो मृगाणामिव यत्तव स्तुतिम् ।
हरे हिरण्याक्षपुरःसरासुरद्विषद्विषः प्रत्युत सा तिरस्क्रिया ॥'

इत्यत्र 'हरि'पदम् । तत्रापि समभिव्याहृत'द्विष'पदप्रतीतगजविरोधादिकमप्राकरणिके सिंहेऽप्यभिधानियामकमस्त्येव ।

---

१. 'स्तवम्' ख. २. 'हरेर्हर' क.

यत्र तु 'यस्याननं योनिरुदारवाचाम्–' इत्यादावश्लीले नैतादृशं नियामकम्, तत्रापि बुभुत्सितार्थव्यासक्तस्य मनसस्तमुल्लङ्घ्यासभ्ये दुर्गन्धादौ प्रवृत्तिवत्प्रकरणनियन्त्रितस्यापि शब्दस्य तदुल्लङ्घ्यविषयत्वाभावादश्लीले प्रवृत्तिरिति न क्वापि शक्तिविषये व्यक्तिरङ्गीकरणीया । यदि चैवंविधानि नियामकानि नाद्रियेरन्, तदोदाहृतस्थलेषु व्यञ्जनव्यापारोऽपि दुर्ग्रहः । तथा हि—प्रकरणादिकमुल्लङ्घ्य व्यञ्जनव्यापारेणाप्यर्थान्तरप्रत्ययो न सर्वत्र वक्तुं शक्यते, प्रकरणादीनामभिधानियामकत्वकल्पनस्यैव व्यर्थत्वापत्तेः । तद्धि नादृष्टार्थम्, किंतु 'सैन्धवमानय' इत्यादावेकार्थमात्रपरनानार्थशब्दस्थले अर्थविशेषस्मृतिव्यवस्थार्थं तत् । यदि तत्रापि व्यञ्जनव्यापारेणार्थान्तरप्रत्ययः स्यात्, तदा कथमेषा सिध्येत् । न ह्यभिमतानभिमतक्षेत्रसाधारणस्य जलाशयस्याभिमतक्षेत्रगामिनीमेकां कुल्यां विधायानभिमतक्षेत्रगामिनः कुल्यान्तरस्यापि कल्पने जलस्याभिमतक्षेत्रैकगामित्वव्यवस्था कृता भवति । तथा च यत्र कवयितुश्चमत्कारायाप्राकरणिकेऽप्यर्थे तात्पर्यम्, यत्र वाश्लीलदोषः, तत्रैव व्यञ्जनाव्यापारोन्मेषः, न सर्वत्रेति तद्व्यवस्थासिद्धये तत्र तत्र नियामकान्यस्मदुक्तानि अन्यादृशानि वावश्यमादर्तव्यानि तेषां चाभिधानियामकत्वमेव वक्तुं शक्यमिति व्यर्थस्तत्र व्यक्तिकल्पनापरिश्रमः, दुर्वारश्च तत्र व्यक्तिवादिमतेऽप्यभिधाव्यापारः । तथा हि—यदि शक्तिरभिधा, निर्विवादमस्त्येवाप्राकरणिकेऽपि सा । यदि च काव्यप्रकाशिकाद्युक्तरीत्या शक्यार्थप्रतिपादकत्वरूपः शब्दव्यापारः, सोऽप्यस्त्येव । न हि तत्राप्राकरणिकशक्यप्रतिपत्तेः शब्दादन्यज्जनकम् । शक्तिग्रहमपेक्ष्य तत्प्रतिपादकत्वमभिधा इति चेत् । अ(य)त्राप्राकरणिकोऽर्थः, तत्रागृहीतशक्तिकस्याभिधया किं न प्रतीयते, येन स तत्र

न स्यात्। ननु शक्त्या साक्षात्प्रतिपादकत्वमभिधा। साक्षादित्यविशेषणे मुख्यार्थशक्तिग्रहमपेक्ष्य तत्प्रतिपादनव्यवधानेन तत्संबन्ध्यर्थान्तरप्रतिपादनरूपाया लक्षणाया अप्यभिधात्वप्रसङ्गात्। तथा च प्रागेवानुवर्तमानेन प्रकरणेन तत्प्रमेयोपस्थापनं शीघ्रभावीति तद्व्यवधानेनार्थान्तरप्रतिपादनं नाभिधा इति चेत्, न। 'तद्विषयशक्तिग्रहमपेक्ष्य तत्प्रतिपादनमभिधा' इति लक्षणं विनैव साक्षात्त्वविशेषणं साधु, अनतिप्रसङ्गात्। तत्पदरूपेण पदभङ्गकृतपदान्तररूपेण वार्थान्तरप्रतिपादनव्यवधानाभावरूपसाक्षात्त्वविशेषणस्य गुरुत्वात्। तथाविशेषणे 'येन ध्वस्तमनोभवेन—' इत्यादौ धूर्जटिपक्षे—स्फुटपदसंबन्धितया प्रसिद्धिप्राचुर्येण च झटित्यर्थप्रतिपत्तिः। वैकुण्ठपक्षे—'येन ध्वस्तमनोभवेन—' इत्यादावस्फुटपदसंनिधि(बन्धि)तया 'शशिमच्छिरोहरः, अन्धकक्षयकरः' इत्यनयोरप्रयुक्तनिहतार्थत्वेनाप्रसिद्धतया च विलम्बेन प्रतिपत्तिरिति सर्वसिद्धत्वेन तत्राभिधाविषयेऽपि तदभावापत्तेः। प्रकृताप्रकृतोभयपरे यत्राप्रकृते प्रसिद्धतरम्, प्रकृतेऽप्रसिद्धतरं पदम्, तत्र प्रसिद्धिप्राचुर्येणाप्रकृतार्थप्रतीतेरेव प्राथमिकत्वेनाप्रकृतेऽभिधा, प्रकृते व्यक्तिः, इति वैपरीत्यापत्तेश्च। प्रकरणमुल्लङ्घ्यापि प्रसिद्धतरार्थस्यैव प्रथमं स्मृतेः। अत एव—'द्व्यर्थमप्रसिद्धेऽर्थे प्रयुक्तं निहतार्थकम्' इत्युक्तलक्षणस्य निहतार्थस्य काव्यदोषत्वमुपगम्यते। प्रसिद्धतराप्रकृतार्थप्रतीत्या प्रकृतार्थप्रतीतेर्व्यवधानात्। न च निहतार्थस्य दोषत्वात्तत्प्रयोगोऽर्थद्वयविवक्षास्थलेऽपि काव्ये न संभवति इति वाच्यम्, श्लेषयमकादिषु तस्य वृद्धैर्दोषत्वाभावस्योपपादितत्वात्। 'अन्धकक्षयकरः', 'राजा हरति लोकस्य', 'राजा राजार्चिताङ्घ्रिरनुपचितकलो यस्य चूडा-

१. 'प्रागेवार्थमनुवर्त' ख-ग. २. 'दोषत्वस्यापोदितत्वात्' ख.

मणित्वम्' इत्यादिदर्शनाच्च । तस्माच्छब्दस्यार्थप्रतिपादनोपयोगितत्प्रत्यासत्तिरूपधर्मभेद एव वृत्तिभेदप्रयोजको न तु तद्भेदाभावः । प्रतिपादनगतसाक्षात्त्वव्यवहितत्वभेदे सत्यपि शक्तिशक्यसंबन्धरूपप्रतिपाद्यप्रत्यासत्तिभेदेनैवाभिधा-लक्षणयोर्भेददर्शनात्, तद्भेदाभावे प्रसिद्धाप्रसिद्धार्थगोचरशब्दश्लेषस्थले लक्षितलक्षणास्थले व्यङ्ग्यस्थले चार्थद्वयप्रतीत्योः साक्षात्त्वव्यवहितत्वभेदे सत्यप्यभिधालक्षणाव्यक्त्यतिरिक्तवृत्त्यदर्शनाच्च, इत्यप्रयोजकस्याव्यवस्थापादकस्य च साक्षात्त्वविशेषणस्यायोगात् 'तद्विषयशक्तिग्रहमपेक्ष्य तत्प्रतिपादकत्वमेवाभिधा' इत्यप्रकृतेऽप्यर्थेऽभिधाव्यापारो दुर्वारः ।

नैयायिकास्तु—प्रसिद्धिप्राचुर्ये सति प्रकरणादिशून्यस्याप्यर्थस्य स्मृतेः, प्रसिद्ध्यभावे प्रकरणादिमतोऽप्यस्मृतेश्च, प्रकरणादिकं नाभिधानियामकम् । शक्तिग्रहसंस्कारपाटवमात्रनियम्यत्वात्तस्याः । किंतु लिङ्गविधया तात्पर्यग्राहकम् । अत एव 'हरिरस्ति' इत्यनारभ्यवादश्रवणेऽपि हरिशब्दस्यार्थमानिलेन्द्रचन्द्रादयोऽर्था इत्यवधार्यते एव वक्तुः क्व तात्पर्यमिति नावधार्यते—इत्याहुः ।

तद्रीत्या न कथंचिदपि प्रकरणाप्रकरणादिनाभिधानियमनं शक्यशङ्कम् । तस्मात् प्रस्तुताप्रस्तुतोभयपरेऽपि प्रस्तुताप्रस्तुतोभयवाच्यार्थेऽभिधैव वृत्तिः । तदुपस्थितेषु च पदार्थेष्वाकाङ्क्षादिसहकारिवशादुभयविधवाक्यार्थप्रत्ययः, इत्यप्रस्तुतविषये न पदार्थप्रतीतये नापि वाक्यार्थप्रतीतये व्यक्तिरुपगन्तव्या । यत्तु प्राचामप्रस्तुते शक्तिमूलव्यञ्जनवृत्त्यभिधानम्, तदप्रस्तुतार्थप्रतीतिमूलके यथा 'उदयमारूढः—'

---

१. 'प्राचां प्र' क; 'प्राग्वामप्र' ख; 'प्राचामप्र' ग.

इत्यादिविशेषणविशिष्टः पृथिवीपतिः स्वल्पैर्ग्राह्यधनैर्लोकस्य हृदयं रञ्जयति, एवं तथाभूतश्चन्द्रमा मृदुलैः किरणैः, इत्यादिरूपेण प्रतीयमाने उपमाद्यर्थालंकारे तदवश्यंभावदृढीकरणाभिप्रायेण । न तु तत्रापि वस्तुतो व्यञ्जनव्यापारास्तित्वाभिप्रायेण ।

'आच्छादितायतदिगम्बरमुच्चकैर्गा-
माक्रम्य च स्थितमुदग्रविशालशृङ्गम् ।
मूर्ध्नि स्खलत्तुहिनदीधितिकोटिमेन-
मुद्वीक्ष्य को भुवि न विस्मयते नगेशम् ॥'

इत्यादिना शब्दशक्तिमूलस्यालंकारध्वनेरेवोदाहरणत्वेन तैरपि लिखितत्वात् ।

'उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम् ।'

इति श्लेषापादितविशेषणसाधारण्यनिमित्तसमासोक्त्यलंकारोदाहरणे रागादिशब्दानामप्रस्तुतेऽप्यभिधावृत्तेरेव श्लेषव्यवहारेण स्फुटीकरणाच्च ।

न च अत्र स्वतोप्रस्तुतयोरपि कामिनोः प्रस्तुतशशिनिशावच्छेदैकत्वेनान्वयान्न तत्र तयोः सर्वथैव प्रकरणासंभवः—इति वाच्यम्, 'विशेषणसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः' इति लक्षणानुरोधेनाप्रस्तुतप्रतिपत्तेर्विशेषणसाम्याधीनत्वेनाप्रस्तुतस्य प्रकरणसंबन्धावगमात्प्रागेव तद्विशेषणेष्वभिधाया वाच्यत्वात् । प्रस्तुतोपमानत्वादिना यथाकथंचिद्भाविप्रकरणसंबन्धस्येहापि सद्भावाच्च । सर्वथाप्रस्तुतासंबन्धस्याप्रस्तुतस्य क्वापि कविवक्ष्यमाणगोचरत्वाभावात् ।

नन्वेवम्—शब्दशक्तिमूलस्यालंकारध्वनेः 'आच्छादितायतदिगम्बरम्—' इत्याद्युदाहरणसत्त्वेऽपि तन्मूलो वस्तुध्वनिर्लुप्येत, निरलं-

१. 'रोगेण' ख-ग. २. 'च्छेदकत्वेनानन्वयात्तत्र' क.

कारेऽप्रस्तुतार्थ एव वस्तुध्वनेरुदाहरणीयत्वात्, तत्र च त्वयाभिधाङ्गीकारात्—इति चेत्, न। यत्राप्रस्तुतेऽर्थेऽभिधयैव प्रतिपाद्यमाने तन्मूलमनभिधेयं वस्तु प्रतीयते तत्र तदङ्गीकारात् इति । यथा—

'शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वम् ।'

इति । अत्र हि 'अशनि'शब्देन प्रस्तुताद्वज्रादन्यस्मिन्समभिव्याहृत-'शनिविरुद्धरूपे' अप्यर्थेऽभिधयैव प्रतिपाद्यमाने 'विरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरुतः' इत्युपश्लोक्यस्य प्रभावातिशयः प्रतीयते । इत्थमेव प्राचीनैरपि शब्दशक्तिमूलो वस्तुध्वनिरुदाहृतः ।

ननु,—

'भ्रमिमरतिमलसहृदयतां प्रलयं मूर्च्छां तमः शरीरसादम् ।
मरणं च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम् ॥'

इत्यत्र 'विष'पदेनाप्रस्तुतं गरलं व्यङ्ग्यं वाच्यस्य 'जलद एव भुजगः' इति रूपकस्य सिद्धिकृदिति वाच्यसिद्ध्यङ्गं गुणीभूतव्यङ्ग्यमुदाहरता मम्मटाचार्येणाप्रस्तुते शक्येऽपि शब्दशक्तिमूलो वस्तुध्वनिरुक्तः । सत्यम् । अप्रस्तुतार्थप्रतीतिमूलतया प्रतीयमानयोर्वस्त्वलंकारयोर्व्यक्त्यवश्यंभावदार्ढ्यायाश्रितम् 'अप्रस्तुतार्थेऽपि व्यक्तिः' इति प्रौढिवादमात्रमवलम्ब्य तत्प्रवृत्तमिति नात्राभिनिवेशः कार्यः ।

ननु—एवं प्रस्तुतार्थपर्यालोचनालभ्ययोरेव वस्त्वलंकारयोर्व्यक्त्युपगमे तत्रार्थशक्तिमूलैव व्यक्तिर्भवेदिति पृथगर्थशक्तिमूलध्वनेः शब्दशक्तिमूलो न स्यात्—इति चेत्, मैवम् । तथात्वेऽपि प्रस्तुताप्रस्तुतोभयसाधारणशब्दसापेक्षतया प्रस्तुतमात्रापरपर्यायशब्दान्तपरिवृत्त्यस-

१. 'प्रकृ[त]भावा' ख; 'प्रस्तुतभावा' ग. २. 'तत्सत्यम्' ग. ३. 'एवमप्रस्तु' ग. ४. 'शब्दमूलो' ख. ग. ५. 'मात्रपर' ख.

हिष्णुत्वेन ततस्तस्य पृथग्व्यवस्थितेः । एवमन्येऽप्यप्रस्तुतशक्ये व्यक्त्यनुपगमे संभाविताः क्षुद्रोपद्रवा निरसनीयाः ॥

इत्यप्पदीक्षितविरचिते वृत्तिवार्तिके मुख्यवृत्तिनिर्णयो नाम प्रथमः परिच्छेदः ।

अथ लक्षणा निर्णीयते ।

सा च मुख्यार्थसंबन्धेन शब्दस्य प्रतिपादकत्वम् ।

तत्सादृश्येन प्रतिपादकत्वरूपा गौण्यपि लक्षणाप्रभेद एव, तत्सदृशेऽपि तन्निरूपितसादृश्याधिकरणत्वपरम्परासंबन्धसत्त्वात् । न हि 'साक्षात्संबन्धे विशिष्टबुद्धियोग्यसंबन्धे वा सत्येव लक्षणा' इति नियमः, चक्षुरादेर्घटनैल्यादिषु संयुक्तसमवायादिवद्विशिष्टबुद्ध्ययोग्यस्य परम्परासंबन्धस्यापि प्रत्यासत्तित्वोपपत्तेः, व्यतिरेकलक्षणास्थले तन्निरूपितविरोधाधिकरणत्वादिपरम्परासंबन्धमात्रेण तादृशेन लक्षणाङ्गीकृतेश्च । एतेन—सादृश्यं न संबन्ध इति गौणी लक्षणातो भिन्ना, विशिष्टधीयोग्यस्यैव संबन्धत्वात् । संयोगे सति 'दण्डी देवदत्तः' इतिवत्सत्यपि सादृश्ये 'सिंहवान् देवदत्तः' इति विशिष्टबुद्धेरदर्शनात्—इति निरस्तम् । विशिष्टबुद्ध्यनियामकपरम्परासंबन्धमात्रस्य प्रत्यासत्तित्वोपपत्तेस्तावता लक्षणाङ्गीकृतेश्च दर्शितत्वात् ।

तस्मात्—सादृश्यगर्भतदन्यसंबन्धनिमित्ततया गौणी शुद्धा चेति लक्षणाया एव द्वैविध्यम् ।

इयं च द्विविधापि लक्षणा प्रत्येकं द्विविधा—निरूढलक्षणा फललक्षणा च । रूढितुल्यतया निरूढलक्षणा । विवक्षितार्थान्तरद्योतनफला फललक्षणा । आद्या यथा—

---

१. 'इति वृत्ति' ख-ग.

'लावण्यसागरभुवि प्रणयं विशेषा-
दुग्धाम्बुराशिदुहितुस्तव तर्कयामि ।
यत्तां बिभर्षि वपुषा निखिलैः प्रतीकै-
रन्यां तु केवलमधोक्षज वक्षसैव ॥'

अत्र 'लावण्य'शब्दस्य लवणत्ववाचिनो हृदयंगमत्वसादृश्यात्सुषमाविशेषे रूढिलक्षणा । एवमालेख्यगजादौ गजादिशब्दस्यापि रूढिलक्षणानुसंधेया । इदं गौण्या उदाहरणम् । शुद्धा यथा—

'कणद्विरेफावलिनीलकङ्कणं प्रसार्य शाखाभुजमाम्रवल्लरीम् ।
कृतोपगूढा कलकण्ठकूजितैरनामयं पृच्छति दक्षिणानिलम् ॥'

अत्र 'द्विरेफ'शब्दस्य 'द्वौ रेफौ यस्य' इति व्युत्पत्त्या भ्रमरशब्दवृत्तेस्तद्वाच्ये रूढिलक्षणा । एवं त्वगादिशब्दानां त्वगिन्द्रियादिष्वपि शुद्धा रूढिलक्षणा द्रष्टव्या ।

(१फललक्षणा यथा—)जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा । सारोपा साध्यवसाना च । शुद्धा च गौणी च । इत्येवं सप्तविधा फललक्षणा ।

जहल्लक्षणा यथा—

'त्वत्पादपद्मसुषमानुकृतिक्षमाणि
प्राप्तुं प्रवालपदभाञ्जि विभूषणानि ।
वल्कावृता धृतजटाः सुरदीर्घिकायां
कल्पद्रुमाः कति गिरीश तपश्चरन्ति ॥'

---

१. 'तत्राद्या त्रिविधा—शुद्धैव सारोपा साध्यवसाना च । फललक्षणा यथा—' क. २. 'यथा मास्ति' ग.

अत्र 'सुरदीर्घिका'पदस्य कल्पद्रुमाधिकरणत्वयोग्ये तत्तीरे लक्षणा । मुख्यार्थस्य तदधिकरणत्वेनान्वयाभावाज्जहल्लक्षणा । कल्पद्रुमाणां तपश्चर्योत्प्रेक्षोपस्कारकं तीरस्यातिशयितपावनत्वद्योतनं फलम् ।

एवं 'गङ्गायां घोषः' इति प्रसिद्धोदाहरणमप्यनुसंधेयम् । तत्र गोस्वामिनः प्रीतये तीरस्याधिकशैत्यद्योतनं फलम् ।

व्यतिरेकलक्षणापि जहल्लक्षणाप्रभेद एव । यथा—

'उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतम् ॥'

अत्रापकारिण्यन्वयायोग्ये 'उपकृता'दिपदैः स्वार्थविरुद्धं लक्ष्यते । 'त्वयापकारे क्रियमाणेऽपि मयैवं प्रियमेवोच्यते' इति स्वसाधुत्वद्योतनं फलम् ।

अजहल्लक्षणा यथा—'कुन्ताः प्रविशन्ति, यष्टयश्च' इति । अत्र 'कुन्ता'दिपदस्य तद्वत्सु पुरुषेषु लक्षणा । कुन्तादेरपि पुरुषसाहित्येन प्रवेशक्रियान्वयादजहल्लक्षणा । तेषां निर्दयप्रहर्तृत्वादिद्योतनं फलम् ।

ग्रामैकदेशदाहादौ सति 'ग्रामो दग्धः, पुष्पितं वनम्' इत्यादिप्रयोगे 'ग्रामा'दिपदस्य स्वार्थैकदेशपरित्यागेन तदेकदेशे वृत्तेर्जहदजहल्लक्षणा दग्धभूयस्त्वादिद्योतनं फलम् ।

सारोपा यथा—

'नाथ त्वदीयमकलङ्कमिमं मुखेन्दु-
मापीय तृप्यति सदा वसुधा यतस्ते ।
तेनैव किं नवसुधारसगोचरोऽभू-
दिन्दुः कलङ्कमलिनीकृतमध्यभागः ॥'

---

१. 'अत्र भीतिपलायनवाक्ये कुन्ता' ख-ग. २. 'तव' क.

अत्र 'इन्दु'शब्दस्य मुखे लावण्यादिसादृश्याद्गौणसारोपलक्षणा । तादृ-प्यप्रतीतिः फलम् । एवं 'गौर्वाहीकः, मुखं कमलम्' इत्यादिव्यासेऽपि गौणसारोपलक्षणा द्रष्टव्या ।

गौणसाध्यवसानलक्षणा यथा—

'नाभेरभूत्तव चतुर्भुज नान्तरिक्षं
यन्नाभिरेव यदुनेतरियं ततोऽभूत् ।
अन्योन्यसंश्रयपराहतिदूषितं य-
दाह श्रुतिस्तदविमृश्य किमर्थतत्त्वम् ॥'

अत्र 'अन्तरिक्ष'पदस्य भगवदवलग्ने सूक्ष्मत्वसादृश्याद्गौणसाध्यवसान-लक्षणा । सर्वथैवाभेदप्रतिपत्तिः फलम् । विषयस्य[1] विषयिभेदेनानपह्नुतेन[2] तद्रूपोपरक्तताप्रतीतिस्तादात्म्यप्रतिपत्तिः, विषयस्य विषयिणैवाभेदप्रतीतिः सर्वथैवाभेदप्रतिपत्तिः, इति सारोपसाध्यवसायलक्षणाफलयोर्भेदः । विषयविषयिवाचकयोर्द्वयोरपि निर्देशे आरोपः, विषयिपदमात्रस्य विषयलाक्षणिकतया निर्देशोऽध्यवसायः, इत्यारोपाध्यवसाययोर्भेदः ।

ननु—सारोपलक्षणोदाहरणे 'मुखेन्दुः' इत्यादौ 'इन्द्वादि'पदस्य मुखादौ न मुखत्वादिना लक्षणा, 'मुख'पदस्यापि सत्त्वेन पौनरुक्त्यापत्तेः । नापीन्दुगतलावण्यादिगुणेन अन्यगुणस्यान्यत्र प्रवृत्तिनिमित्तत्वायोगात् । नापि मुखगतलावण्यादिगुणेन, मुख्यार्थसंबन्धरहितगुणमुखेन लक्षणा-योगात् । मैवम् । मुखचन्द्रोभयानुगतलावण्यसामान्यादिमुखेन लक्षणोपगमे दोषद्वयस्याप्यसंस्पर्शात् । इदमेवाभिसंधायोक्तं वृद्धैः—'लक्ष्य-माणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता' इति ।

---

१. 'विषयस्य' न,-ख-ग. २. 'पह्नवेन' ख-ग.

शुद्धसारोपलक्षणा यथा—

'आपादमाचिकुरभारमशेषमङ्ग-
मानन्दसारमरविन्ददृशामसीमम् ।
अन्तर्मम स्फुरतु संततमन्तरात्म-
न्नम्भोजलोचन तव श्रितहस्तिशैलम् ॥'

अत्र भगवदङ्गेष्वानन्दकारित्वेन 'आनन्द'पदस्य सारोपलक्षणा । आनन्दकरणे इतरवैलक्षण्यद्योतनं फलम् । आनन्दकारिणि विषयनिगरणेन 'आनन्दोऽयम्' इति प्रयोगे साध्यवसायलक्षणा । आनन्दव्यभिचारद्योतनं फलम् । एवं शुद्धा पञ्चविधा, गौणी द्विविधा, इति सप्तविधा फललक्षणा ।

ननु—गौण्यामपि जहदजहल्लक्षणाभेदौ संभवतः, 'मुखं कमलम्', गौर्वाहीकः' इत्यादौ जहल्लक्षणा तावत्स्फुटैव । अजहल्लक्षणापि गोवाहीकोभयविषये 'गाव एते समानीयन्ताम्' इत्यादौ दृश्यते । अतः कथं द्विविधैव गौणी? उच्यते—मुख्यार्थसादृश्येन लक्षणा गौणी । न च तत्रैव तत्सादृश्यमस्ति, येन मुखेऽपि गौणी वृत्तिः स्यात् । शुद्धा त्वजहल्लक्षणा, 'कुन्ताः प्रविशन्ति' इत्यादौ विशेषणवाचिनो विशिष्टे संभवति विशिष्टविशेषणयोरेकदेश्येकदेशभावरूपसंबन्धसत्त्वात् । अतो 'गाव एते समानीयन्ताम्' इत्यादावभिधालक्षणाभ्यामेवार्थद्वयप्रतिपादनं 'गङ्गायां जलं घोषश्च तिष्ठति' इत्यत्रेवेति न गौण्या जहदजहल्लक्षणाभेदसंभवः । तस्मात्सैव लक्षणाभेदा इति । इत्थमयं चिरंतनैः प्रदर्शितो लक्षणाविभाग इति ।

अत्रेदं प्रतिभाति—शुद्धासु साध्यवसायलक्षणाभेदकथनमयुक्तम्,

१. 'इत्यत्रान्वेति' ख-ग. २. 'प्रभेद' ख-ग.

परार्थं स्वसमर्पणस्याविशेषेण तस्य जहल्लक्षणानतिरेकात् । न हि तदविशेषेऽपि सारोपलक्षणायां विषयवाचकसामानाधिकरण्यकृतवैचित्र्यान्तरमस्ति, येन तद्वदेव जहल्लक्षणातः पृथगुदाह्रियेत ।

ननु—'कार्यकारणभावसंबन्धेन वृत्तिः इत्यत एव पृथक्त्वमस्तु, कार्यकारणभावातिरिक्तेन गङ्गातीरादिगतसंयोगादिसंबन्धेन वृत्तौ जहल्लक्षणा' इत्यसंकरोपपत्तेः । मैवम् । 'राजकीयः पुरुषो राजा, इन्द्रार्था स्थूणा इन्द्रः, अतक्षायं तक्षा, अग्रहस्तोऽयं हस्तः' इति स्वस्वामिभावतादर्थ्यतात्कर्म्यावयवावयविभावेष्वपि कार्यकारणभाव इव सारोपाध्यवसायलक्षणयोराकरग्रन्थेषूदाहरणादाश्रयाश्रयिभावसंबन्धेऽप्यलंकारसुधानिधावुदाहरणाच्च वैचित्र्यान्तराभावेऽपि संबन्धभेदमात्रेण विधान्तरोपगमे संबन्धभेदान्तरमवलम्ब्यापि विधान्तरोपवर्णनस्य प्रत्याख्यातुमशक्यतया सप्तविधत्वनियमासामञ्जस्यप्रसङ्गाच्च ।

ननु—साध्यवसायलक्षणोदाहरणेष्वभेदाभिव्यक्तिरस्ति, 'अयमानन्दः, अयं राजा' इत्यादावानन्दराजाद्यभेदाभिव्यक्तिपूर्वकमेवानन्दाद्यभिचारित्वानुल्लङ्घ्यशासनत्वादिफलप्रतीतेः, अतो व्यङ्ग्यवैचित्र्येण भेदोऽस्तु इति चेत्, न । जहल्लक्षणोदाहरणेऽपि तीरे प्रवाहाभेदाभिव्यक्तिपूर्वकमेव तत्र तद्गतातिशायितशैत्यपावनत्वादिफलप्रतीतेः । तीरे प्रवाहतादात्म्यप्रतीत्यभावे तत्र प्रवाहगतातिशयितशैत्यादेः प्रत्ययासंभवात् । न हि तीरे गङ्गासंबन्धप्रयुक्तं तद्गतस्वाभाविकशैत्यादिद्योतनमेव लक्षणाफलम्, येन गङ्गादिसंबन्धितीरत्वेन लक्षणयैव तल्लभ्यते इति नाभेदाभिव्यक्तिरङ्गीक्रियते, सत्यपि मुख्ये

१. 'संबन्धे' क. २. 'वर्णनस्यापि' ख-ग. ३. 'शैत्यपावनत्वा(दे)ः प्र' ख; 'शैत्यपावनत्वप्रत्य' ग.

गङ्गातीरादिपदे स्वायत्ते च शब्दप्रयोगे मुख्यप्रयोगादपि लभ्यस्य लक्षणाफलत्वायोगात्। काव्यसरणौ—'लक्षणायां काव्यशोभातिशयाधायकतयाप्यधिकं स्तोतुकामस्तस्य प्रवाहतादात्म्यप्रतिपत्त्या तद्गतातिशयितपावनत्वद्योतनाय तस्मिन्गङ्गापदं प्रयुङ्क्ते' इति दर्शनाच्च। अतो जहल्लक्षणायामप्यभेदाभिव्यक्तिरविशिष्टा। उक्तं च काव्यप्रकाशिकायाम्—'तटादीनां गङ्गादिशब्दप्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसंप्रत्ययः' इति। रत्नाकरेणाप्युक्तम्—'स्रोतस्तीरयोरेकशब्दबोध्यत्वेन तादात्म्यप्रतीतेः स्रोतोधर्माः शैत्यपावनत्वादयस्तीरे प्रतीयन्त इति प्रयोजनसिद्धिः' इति। अतः साध्यवसायलक्षणायाः फलकृतोऽन्यकृतो वा न जहल्लक्षणातो भेदः संभवति इति न तदुदाहरणपार्थक्यं[1] युक्तम्। तथा सारोपलक्षणोदाहरणे उपमानोपमेयानुगतसाधारणधर्ममुखेन लक्षणा इत्ययुक्तम्। तथासति तत्र साधारणधर्मस्यापि पदान्तरेणोपादानं तत्र पौनरुक्त्यापत्तेः। यथा—

'ताराभिरामपरिणाहलसत्सिताभ्रं
तापिच्छमेचकमुरःशरदन्तरिक्षम्।
प्राप्यैव देव तव कौस्तुभपूर्णचन्द्रः
पूर्णो बिभर्ति पुरुषोत्तम कान्तिरेखाम्॥'

अत्र हि वक्षोऽन्तरिक्षयोः साधारणः परिणाहित्वमेचकत्वादिधर्मोऽपि पृथगुपात्त एव। 'उपात्तधर्मातिरिक्तधर्ममुखेन लक्षणास्तु' इति चेत्, न। उपात्तमेचकत्वादिव्यक्त्यतिरिक्तसामान्यधर्मास्फुरणेऽपि सहृदयानां परिपूर्णवाक्यार्थप्रतीतिदर्शनाद्द्रव्यत्वादिसामान्यधर्मस्य कवितानङ्गत्वात्। अन्ततः कवयितुरप्येतादृशस्थलेषूपात्तधर्मातिरिक्तधर्मगर्भीकाराभावाच्च।

---

१. 'पार्थक्ययुक्तम्' ख-ग.

ननु—इह मा भूत्सारोपलक्षणा । 'उर एव शरदन्तरिक्षम्' इति मयूरव्यंसकादिसमासोपगमे हि सा भवति । किंतु—'उरः शरदन्तरिक्षमिव' इत्युपमितसमासोऽस्तु । तत्र च विग्रहवाक्यस्थो लुप्त इवकारः सादृश्यं प्रतिपादयतीति 'नोपमानवाचकस्योपमेये लक्षणा' इत्यालंकारिकाणामभ्युपगमः । तत्र तैर्लुप्तोपमाङ्गीकारात्; इति न कश्चिद्दोषः इति चेत्, न । मेचकत्वादिसामान्यस्य शब्दोपात्ततयोपमितसमासासंभवात् । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति सामान्याप्रयोगे एव तत्समासानुशासनात् । आलंकारिकैरपि—'सामान्यप्रयोगे सत्युपमाबाधकसत्त्वात्सारोपलक्षणामूलको रूपकालंकारः । नतूपमालंकारः' इत्यभ्युपगमात् । उपमितसमासे धर्मवाचकलुप्तोपमालंकारस्यैव तैरुदाहरणाच्च । सामान्यधर्मप्रयोगेऽप्युपमितसमासाङ्गीकारे हि केवलवाचकलुप्तापि तत्रोदाह्रियेत ।

नन्वेवं साधारणधर्मप्रयोगे सादृश्यमुखेन लक्षणास्तु तद्वाचकस्य यथा-इव-वाऽऽदेरप्रयोगेण पौनरुक्त्याप्रसङ्गात् । तत्प्रयोगे उपमानवाचकस्य सादृश्यप्रतियोगिभूतस्ववाच्यपरतयोपमेयलक्षणाया अवाच्यत्वात्—इति चेत्, न । तथासति सादृश्यस्य शब्दोपात्तत्वेनोपमालंकारस्य प्राप्त्या 'सारोपलक्षणायां रूपकादिरलंकारः, नोपमा' इत्यलंकारविभागासामञ्जस्यप्रसङ्गात् । न हि सादृश्यस्य वाच्यत्व एवोपमा, 'कमलसुहृन्मुखम्' इत्यादौ 'सुहृदादि'पदेन लक्षणायामप्युपमासंप्रतिपत्तेः, । अपि च—'पादाम्बुजम्' इत्यादौ व्याघ्रादेः समासेनोपमायाः, मयूरव्यंसकादिसमासेन रूपकस्य च संभवेन सर्वत्रानवधारणे प्राप्ते यत्र,-

---

१. 'वाचकासत्त्वा' ख-ग. २. 'सामान्यधर्मे' क. ३. 'तत्तत्प्रयोगे' ख-ग. ४. 'सादृश्यश' क. ५. 'सादृश्यवाच्यत्व' क.

'पादाम्बुजं भवतु वो विजयाय मञ्जु
मञ्जीरशिञ्जितमनोहरमम्बिकायाः ।'

इत्यादौ पादे संभवन्मञ्जीरयोगादिकं निबध्यते, तत्र तदानुगुण्यात्पूर्वपदार्थप्रधानेन व्याघ्रादिसमासेनोपमालंकारः यत्र तु,-

'यस्यानिशं दिविषदश्चरणारविन्द
मुत्तंसयन्त्यमिलमक्तिभरावनम्राः ॥'

इत्यादावरविन्दकार्यमुत्तंसनादिकं निबध्यते, तत्र तदानुगुण्यादुत्तरपदार्थप्रधानेन मयूरव्यंसकादिसमासेन रूपकालंकारः, इति व्यवस्था सर्वैरपि प्रतिपाद्यते । न च—इयं व्यवस्था 'चरणारविन्दम्' इत्यादिरूपकस्थलेषु 'अरविन्दादि' पदानामरविन्दत्वाद्याकारमपहायारुणिमादिसाधारणधर्ममुखेन तन्निबन्धनसादृश्यमुखेन वा चरणादिलक्षकत्वे युज्यते । तथा सत्युत्तरपदार्थस्यारुण्यसादृश्यगुणस्य प्राधान्यादियोगेन मयूरव्यंसकादिसमासाश्रयणेऽपि व्याघ्रादिसमासाश्रयण इव पूर्वपदार्थचरणस्यैव प्राधान्यापत्त्योत्तंसनानुगुण्यस्य विरहतौल्यापत्तेः । गुणजात्योर्जातिप्राधान्यस्य नीलोत्पलादौ व्यवस्थितेः । उत्तरपदार्थस्य प्राधान्येऽप्यरविन्दजातेरिवारुण्यसादृश्यादिगुणस्योत्तंसनानुगुणत्वाभावाच्च । तस्मात्—'सारोपलक्षणोदाहरणेषु साधारणधर्मादिमुखेन लक्षणा—' इत्ययुक्तम् । तथा—'ताद्रूप्यप्रतीतिरत्र फलम्—' इत्यप्ययुक्तम् । सामान्यधर्ममुखेन सादृश्यमुखेन वा लक्षणोपगमे ताद्रूप्याभिव्यक्त्ययोगात् तथा हि—'कान्तिमन्मुखम्', 'चन्द्रसदृशं मुखम्' इत्यादिरर्थः संपद्यते । न चैतावता ताद्रूप्याभिव्यक्तिः, 'कान्तिमन्मुखम्' इत्यादिप्रयोगेऽपि तत्प्रसङ्गात् । न च—'गङ्गायां घोषः' इत्यादौ स्रोतस्तीरयोरभेदा-

१. 'सादृश्यादिगुणस्य' ख-ग. २. 'प्राधान्यायोगेन' ख-ग. ३. 'नुगुणस्य' क.

ध्यवसायवन्मुखचन्द्रयोरेकशब्दबोध्यतया केवलशब्दशक्तिमूलव्यञ्जनव्यापारेण तादृप्याध्यवसाय इति नातिप्रसङ्गः—इति वाच्यम्, तदा मुखकान्तिमतोरेव तादृप्याभिव्यक्तेः संभवेन 'वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरुज्जृम्भते' इत्यादावानुभाविकस्य मुखत्वोपरक्तचन्द्रतादृप्यप्रत्ययस्याक्षिप्तसमर्थनासंभवात् । तथा 'मुखं कमलम्' इत्यादिव्यासेऽपि सर्वत्रविषयविषयिपदयोः सामानाधिकरण्ये सारोपलक्षणा इत्यप्ययुक्तम् ।

'विद्वन्मानसहंस वैरिकमलासंकोचदीप्तद्युते
दुर्गामार्गणनीललोहित समित्स्वीकारवैश्वानर ।
सत्यप्रीतिविधानदक्ष विजयप्राग्भावभीम प्रभो
साम्राज्यं वरवीर वत्सरशतं वैरिञ्चमुच्चैः क्रियाः ॥'

इत्यत्र 'हंसादि'शब्दानां वर्ण्ये राजनि प्रत्यासत्तिरूपमुख्यसादृश्याप्रतीत्या[1] लक्षणासंभवात् । तथा हि—विदुषां मानसं हृदयमेव मानसं सर इत्यादि श्लेषभित्तिकाभेदाध्यवसायलभ्यमानसवासित्वादिसाधारणधर्मनिबन्धनमेव तत्र सादृश्यं वाच्यम् । तदन्यमुखकमलादिवत्प्रसिद्धसादृश्यस्याभावात् । न च—तेन सादृश्येन लक्षणा संभवति, तल्लम्भकस्य श्लेषस्य रूपकोत्थाप्यतया रूपकापेक्षलक्षणादशायां तस्य बुद्धिपथानारोहात् । न च—श्लेषस्यैव प्राथम्यं किं न स्यात्—इति वाच्यम्; रूपकं विना कवेरर्थद्वयविवक्षायामिह गमकाभावेन श्लेषानिवृत्तेः । अभिधायाः प्रकरणनियम्यत्वपक्षे प्राचीनाभिमते रूपकात्प्राक्प्रकरणसंबन्धरहितसारोपलक्षणार्थान्तराभिधानस्येवासंभवात् ।

'रूपकं पूर्वसंसिद्धं श्लेषं तज्ज्ञापयेद्यदि ।
तदा रूपकमेव स्यादन्यथा श्लेष इष्यते ॥'

---

१. 'सादृश्यप्रतीत्या' **ख-ग.**

इति श्लेषरूपकयोर्विभागं व्यवस्थापितवता चक्रवर्तिनाप्यस्मिन्नुदाहरणे रूपकोपवर्णनेनात्र श्लेषपाश्चात्यत्वस्यास्फुटीकरणाच्चेति। अत्रेदं तत्त्वम्—'विद्वन्मानसहंस—' इत्यादौ 'हंसादि'पदानां वर्ण्ये राजनि लक्षणा नाङ्गीकर्तव्या, सामानाधिकरण्येन वर्ण्यस्य राज्ञः प्रसिद्धहंसजातीयादिभिरभेदस्य वाक्यार्थविधेयैव[1] प्रतीत्युपपत्तेः। न च—एवमभेदप्रत्ययसंभवेऽपि तादूप्यप्रत्ययो न लक्षणां विना सिध्येत्। स एव च विषयविषयिपदसामानाधिकरण्यस्थले सर्वत्र विवक्षितः इति वाच्यम्, तत्र मानाभावात्। 'ऊर्ध्वं विरञ्चिभवनात्तव नाभिपद्मात्' इत्यादौ विषयविषयिपदसामानाधिकरण्येऽप्येवकारसाक्षात्पदाभ्यामुरःस्थले प्रसिद्धपद्मपदाभेदविवक्षाया एव स्फुटीकरणाच्च। न च—एवं 'विद्वन्मानसहंस' इत्यादावतिशयोक्तिरेव स्यात् 'विषयस्य विषयितादूप्ये रूपकम्, विषय्यभेदेऽतिशयोक्तिः' इति व्यवस्थितेः। तथा च—'विषयविषयिसामानाधिकरण्यस्थले रूपकम्, विषय्यभेदमात्रनिर्देशस्थलेऽतिशयोक्तिः' इति व्यवस्थाविभागः इति वाच्यम्।

'हृत्पङ्कजानि भजतां प्रतिबोधयन्ती
संसारसागरमपि प्रविशोषयन्ती।
ज्योत्स्ना त्वदङ्घ्रिनखचन्द्रसमुद्गतेय-
मन्यादृशीमभयदां प्रकृतिं बिभर्ति॥'

इत्यत्र नखकान्तिरूपविषयनिगरणेन 'ज्योत्स्ना' इति विषयिपदमात्रनिर्देशेऽपि पङ्कजविकासकत्वादिना प्रसिद्धज्योत्स्नातो व्यतिरेकेण तत्तादूप्यमात्रप्रतीतेर्दर्शनेन व्यवस्थाद्वयस्याप्यशक्याङ्गीकारत्वात्। तथा च यदि 'तादूप्ये रूपकम्, अभेदेऽतिशयोक्तिः' इति व्यवस्था

१. 'विरोधयैव' क.

परित्यज्य 'विषयविषयिपदसामानाधिकरण्ये रूपकम्, विषयिपदमात्रनिर्देशेऽतिशयोक्तिः' इति व्यवस्थाद्रियते, तदा 'विद्वन्मानसहंस-' इत्यादावभेदप्रतीतौ सत्यामपि रूपकं संभवतीति न काचिदनुपपत्तिः । यदि च तथा सति रूपकातिशयोक्त्योः शब्दवैचित्र्यमात्रभेदप्राप्त्या परस्परमर्थालंकाररूपत्वं न स्यादित्याद्या व्यवस्थाद्रियते, तदा 'ज्योत्स्ना त्वदङ्घ्रिनख—' इत्यादौ विषयिपदमात्रनिर्देशेऽपि प्राचीनमर्यादायामतिशयोक्तिमपहाय रूपकमेवाङ्गीकर्तव्यम् । तद्वत् 'विद्वन्मानसहंस—' इत्यादौ विषयविषयिपदसामानाधिकरण्येऽप्यतिशयोक्तिरङ्गीक्रियताम् । किमनुपपन्नम् । तस्मात्—एतादृशस्थले समभिव्याहारादभेदप्रतीत्युपगमे न कश्चिद्दोष इति व्यर्थो लक्षणोपपादनप्रयासः । न च एवं सर्वत्र विषयविषयिसामानाधिकरण्यस्थले समभिव्याहारादभेदप्रतीतेर्वक्तुं शक्यत्वात्कचिदपि सारोपलक्षणा न स्यात्—इति वाच्यम्, इष्टापत्तेः ॥

इति[1] श्रीअप्पदीक्षितविरचिते वृत्तिवार्तिके लक्षणावृत्तिनिर्णयो नाम द्वितीयः परिच्छेदः ।

समाप्तश्चायं समुपलभ्यमानो ग्रन्थः ।

---

१. 'इति वृत्तिवार्तिके' ख-ग.

वैयाकरणसिद्धान्तमञ्जूषास्थो व्यञ्जनानिर्णयः ।



(अस्मिन्वृत्तिवार्तिकग्रन्थे व्यञ्जनावृत्तिनिर्णयस्य प्रारम्भप्रतिज्ञातस्यापि सकलदर्शेष्वदर्शनात्तन्निरूपणस्यात्यावश्यकत्वाच्च नैयायिकप्रबन्धेषु तदनादरेण वैयाकरणग्रन्थेषु तदादरेण नागेशभट्टविरचितवैयाकरणसिद्धान्तमञ्जूषास्थ एव व्यञ्जनानिर्णयो लिख्यते—)

मुख्यार्थसंबद्धासंबद्धसाधारणमुख्यार्थबाधग्रहाद्यप्रयोज्यप्रसिद्धाप्रसिद्धार्थविषयकधीजनकत्वं व्यञ्जना । सा चेयं शब्दतदर्थपदपदैकदेशवर्णरचनाचेष्टादिषु सर्वत्र, तथैवानुभवात् । 'अनया काटक्षेणाभिलाषो व्यञ्जितः' इति सर्वजनप्रसिद्धेस्तस्यां चेष्टावृत्तित्वस्याप्यावश्यकत्वाच्च । एतेन—'अर्थादीनां न व्यञ्जकत्वम्, किंतु पदस्यैव' इत्यपास्तम् ।

'रतिकाले विलोक्य श्रीर्नाभिपद्मे पितामहम् ।
रसाकुलाच्छादयते दक्षिणं नयनं हरेः ॥'

इत्यादौ 'हरि'पदेन 'दक्षिणनयनस्य सूर्यात्मकत्वम्, तन्निमीलनेन सूर्यास्तः, तेन पद्मसंकोचः, तेन पितामहस्थगनम्, तेनाप्रतिबद्धं रतिविलसितम्' इति क्रमेण व्यङ्ग्येषु प्रतीयमानेषु तत्तदर्थप्रतीत्युत्तरमेव व्यङ्ग्यप्रतीतेरर्थस्यापि व्यञ्जकत्वावश्यकत्वात् ।

'पश्यात्र नलिनीपत्रे बलाका दृश्यतेऽचला ।
रम्ये मारकते पात्रे शुक्तिकेव च निर्मला ॥'

इत्यत्रापि निश्चलत्वेन शुक्त्युपमया चाश्वस्तत्वम्, तेन निर्जनत्वम्, तेन 'तदेवावयोः संकेतस्थानम्' इत्यादिषु क्रमेण प्रतीयमानेषु तत्तदर्थव्यङ्ग्येष्वपि बोध्यम् । पदस्य च तत्तत्स्वार्थबोधने उपरतत्वा-

त्पुनःपुनरनुसंधानकल्पने गौरवम्, तदननुभवाच्च। अनया चार्थबोधे जननीये वक्तृबोद्धव्यवाच्यादिवैशिष्ट्यज्ञानं प्रतिभा च सहकारि तद्धी-जनकज्ञानजनकमेव वा। अतो नातिप्रसङ्गः। प्रतिभा च नवनवो-न्मेषशालिनी बुद्धिः। तदुक्तम्—

'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता।'

इति। नवनवोन्मेषो जन्मान्तरीयतद्धीजनकत्वज्ञानजन्यसंस्कारोद्बोधः। 'वक्त्रादिवैशिष्ट्यसहकारेण तज्जनिका बुद्धिः प्रतिभा' इति फलितम्। एवं च शक्तिरेतज्जन्मगृहीतैवार्थबोधिका, व्यञ्जना तु जन्मान्तरगृ-हीतापि, इत्यपि शक्तेरस्या भेदकम्। इदमेवाभिप्रेत्य 'व्यञ्जना स्वरूपसती हेतुः' इति प्रवादः। यद्यपि प्रागुक्तरीत्या लक्षणातोऽपि भेदः सिद्धः, तथापि प्रकारान्तरेणापि भेदं वक्तुं 'मुख्यार्थ—' इत्या-द्युक्तम्। 'पश्यात्र नलिनीपत्रे—' इत्यादौ वक्तृतात्पर्यविषयीभूतवा-च्यार्थबाधाभावेऽपि तज्ज्ञानाभावेऽपि प्राग्दर्शितव्यङ्ग्यप्रतीतेः, मुख्या-र्थबाधज्ञानसत्त्वे तदप्रतीतेश्च न व्या(वैय)ञ्जनिकबोधे तस्य सह-कारित्वम्। एवं 'गतोऽस्तमर्कः' इत्यादेः शिष्येण संध्यावन्दनादेः कर्तव्यत्वाभिप्रायेण गुरुं प्रति प्रयुक्ताद्वक्तृतात्पर्याभावेऽपि प्रतिवेश्या-दीनामभिसरणीयक्रमादिबोधस्य वाच्यार्थप्रतीतिपूर्वकस्य वाच्यार्थबाध-ज्ञानेऽजायमानस्य लक्षणयोपपादयितुमशक्यत्वाच्च। यत्तु 'गतोऽस्तमर्कः' इत्यादौ न व्यञ्जना, एकसंबन्धिदर्शनादपरसंबन्धिस्मरणवदुपपत्तेः, इति; तन्न। असंबद्धव्यङ्ग्यप्रतीतावस्यासंभवात्। किंच 'गतोऽस्तमर्कः' इत्यादिश्रवणोत्तरं 'संध्यावन्दनकर्तव्यत्वं मया स्मृतम्' इत्यनुव्यवसाया-भावात्, तत्तानुल्लेखाच्च। 'इदं पदमेतदर्थस्य न वाचकम्, नापि लक्ष-कम्, नापि स्मारकम्। अपि तु व्यञ्जनया बोधकम्' इति प्रामाणिकव्यव-

हारेणाप्यतिरिक्ततत्सिद्धेश्च । एतेन—तत्तदर्थानां वक्त्रादिवैशिष्ट्यप्रतिभादिसहकृतमनसैव विशिष्टधीसंभवात् । चमत्कारं प्रति शाब्दस्येव मानसस्यापि चेष्टानुरोधेन हेतुतायाः क्लृप्तत्वाच्च व्यञ्जनासत्त्वे न मानम् । प्रतिभा च तत्तत्पदपदार्थविषयकसंस्कारोद्बोधको बुद्धिविशेषः । तत्र च तत्तदर्थज्ञानं वक्त्रादिवैशिष्ट्यं ज्ञानं च सहकारि—इति परास्तम् ॥

'व्यङ्ग्योऽर्थोऽनुमेयः' इति त्वयुक्तमेव, विरुद्धानैकान्तिकेभ्यो व्याप्तिपक्षधर्मतादिनिर्णयाभावेऽपि व्यङ्ग्यार्थप्रतीतेः । किं च—सिद्धिसत्त्वेऽपि व्यङ्ग्यार्थबोधदर्शनेन तत्प्रतिबध्यतावच्छेदककोटौ तत्तद्भेदनिवेशेऽतिगौरवापत्त्या व्या(वैय)ञ्जनिकबोधस्यातिरिक्तत्व एव लाघवम् । अन्यथा शब्दप्रामाण्यस्याप्युच्छेदापत्तिरित्यन्यत्र विस्तरः । बोधकत्वस्य चेष्टायां सत्त्वेऽपि तन्निष्ठबोधकत्वं न शक्तिः, 'चेष्टा शक्ता' इति प्रामाणिकव्यवहाराभावात् किं तु तज्जन्यबोधे तज्ज्ञानस्य कारणत्वं बोध्यम् । तत्तद्वाचकशब्दस्मरणद्वारा चेष्टया बोधः—इत्यपि कश्चित् । तन्न । चेष्टयैडमूकादिव्यवहारानापत्तेः । 'तस्यापि जन्मान्तरीयशब्दस्मरणम्' इत्यन्ये ॥

अत एव निपातानां द्योतकत्वमाकरे उक्तम् । स्फोटस्य च व्यङ्ग्यता हर्यादिभिरुक्तैव । द्योतकत्वं च समभिव्याहृतपदशक्तिव्यञ्जकत्वमेव—इति वैयाकरणानामप्येतत्स्वीकार आवश्यकः ॥

इति श्रीनागेशभट्टविरचितायां वैयाकरणसिद्धान्तमञ्जूषायां व्यञ्जनानिरूपणम् ।

निर्णयसागरेऽङ्कितानि विक्रय्यपुस्तकानि ।

श्रीमद्भागवतम् ।

श्रीधरीव्याख्यया विषमस्थलविमर्शिन्या टिप्पण्या च समलङ्कृतम् ।

(द्वितीयं संस्करणम्)

सुप्रसिद्धमेवेदं पुराणं धरामण्डलेऽखिलपुराणग्रन्थमूर्धन्यमिति । नैतादृशी काव्यरचनाचातुरी व्यासप्रणीतेष्वपि पुराणान्तरेषु दरीदृश्यते । एतद्व्याख्यानान्तरेष्वपि श्रीधरस्वामिप्रणीतैव व्याख्या गौरवेणातिशेते । अत्र विशेषस्त्वेतावानेव यत्र यत्र भगवतो भागवतानां च प्रसङ्गे क्वचन परिपन्थिभिर्दैत्यादिभिर्निन्दनोपहासादि विहितं तेष्वेव पद्येषु निगूढं दधिपयसोर्नवनीतमिव वाग्देवीष्टं स्तुतिगर्भमर्थान्तरमपि संभवतीति तत्रभवद्भिः स्वामिचरणैः क्वचनोद्धृतमेव । परं च यत्र तैरुपेक्षितं तत्रानेकव्याख्यालोचनेन विशदीकृत्य पाठान्तरैश्च संयोज्यानवबोधस्थले यथावत् स्पष्टीकरणं टिप्पणीरूपेण विहितमस्ति । एतदन्तर्गतः क्वचांशोऽपि यथाध्यायक्रमं विषयानुक्रमरूपेण योजितोऽस्ति । तेनाविदितभागवतक्रमाणामप्यभीप्सितबोधः सुतरामनायासेन भूयात् । प्रतिस्कन्धादौ तत्र तत्रापतितकथानिरूपकानुपमचित्राण्यपि सन्ति योजितानि । वर्षीयांसोऽप्यक्लेशेन वाचयेयुरिति स्थूलमातृकाभिरङ्कितोऽयं सर्वाङ्गसुन्दरो ग्रन्थोऽखिलविद्वज्जनादरणीयतामावहेतेत्याशास्यते ।

मूल्यं १५ रू., प्रे. व्य. रू. ४

सांख्यतत्त्वकौमुदी

सारबोधिनीटीकासहिता ।

सांख्यसिद्धान्तस्य सर्वत्र प्रचलितोऽयं ग्रन्थो नाद्यावधि सरलया टीकयोपेतः क्वाप्युपलब्धो ह्यासीत् इति सारबोधिनीनाम्न्या सुगमटीकयालङ्कृतो ग्रन्थद्वयविनिगमको भवेदिति प्रथमत एव प्रसिद्धिं नीतोऽस्ति । **मूल्यं २ रू., प्रे. व्य. ८ आ.**

निर्णयसिन्धुः (मूलम्)।

परिच्छेदत्रयात्मकः ।

अस्मिन्नार्याणां सनातनधर्मनिर्णयो यथावद्वर्णितोऽस्ति ।
टिप्पणं निर्णये ह्युपयुक्तं स्यादिति योजितं चास्ति ।

मूल्यं २॥। रू., प्रे. व्य. ८ आ.

महाकविभासप्रणीतं

स्वप्नवासवदत्तम् ।

दत्तवाडकरोपाह्वेन पुरुषोत्तमशास्त्रिणा प्रणीतया विस्तृतया सुलभया च व्याख्यया समुल्लासितमिदं नाटकं कलिकाता-वाराणसी-संस्कृतपरीक्षार्थिनां तथा आंग्लमहाविद्यालयेषु विशेषेण संस्कृतभाषाध्येतॄणां कृतेऽतीवोपयुक्तं वर्तते। व्याख्यानावसरे साहित्यदृष्ट्या ध्वन्यलंकारवृत्तानां यथावन्निर्देशं कृत्वा रूपकप्रकरणान्तर्भाविनां पदार्थानामपि लक्षणादीनि स्थाने स्थाने वितीर्णानि, अङ्कस्य प्रारम्भे तस्य विषयः संक्षेपेण सुलभया भाषया प्रतिपादितः, तत्रैव च स्थलकालयोरपि निर्णयः सूक्ष्मतया विचार्यावतारितः। सर्वमेतत् खलु व्याख्याया नावीन्यं प्रकटीकरोति। नायक-नायिका-वस्तु-रसादीनां संक्षेपतो विवेचनं प्रस्तावनाप्रसङ्गेन दत्वापि तस्य सौन्दर्यं पुनः किमपि विवर्धितमेव । अत एवावश्यं संग्राह्यमिदं पुस्तकं गीर्वाणवाणीरसिकैः । मूल्यं १ रू., प्रे. व्य. ४ आ.

रसगङ्गाधरः ।

महाकविश्रीजगन्नाथपण्डितरायविरचितः,
नागेशभट्टकृतया गुरुमर्मप्रकाशटीकया,
मञ्जुनाथकृतया सरलया च समेतः ।

मूल्यं ४ रू., प्रे. व्य. ८ आ.

हितोपदेशः ।

श्रीनारायणपण्डितेन संगृहीतः ।

मित्रलाभ-सुहृद्भेद-विग्रह-सन्ध्यादिप्रकरणरूपः संस्कृतोक्तिषु पाटवं, वाचां वैचित्र्यं संपादयितुं च बालानां परमोपकारक इत्यस्माभिः प्रकटीकृतः सर्वत्र व्युत्पित्सुकृते प्रचलितश्चास्ति । **मूल्यं १२ आ. प्रे. व्य. ३ आ.**

कादम्बरी ।

महाकविश्रीबाणभट्टतत्तनयविरचिता ।

महोपाध्यायभानुचन्द्रसिद्धचन्द्राभ्यां कृतया टीकयानुगता ।

सकलगद्यग्रन्थमूर्धन्योऽयं ग्रन्थः सहृदयहृदयाह्लादकः चन्द्रापीड—कादम्बर्यादिविविधचरितवर्णनात्मकः शब्दार्थालंकारोदधिरूपो विदुषां छात्राणां चोपकृतये भूयादिति महता प्रयासेन संपाद्य टीकाभिश्चयविवेकात्मकटिप्पणेन च समलंकृत्य विद्वद्वरैश्च संशोधय्य मुद्रितः । **मूल्यं ६ रू., प्रे. व्य. १२ आ.**

पञ्चतन्त्रकम् ।

श्रीविष्णुशर्मसंकलितम् ।

मित्रभेदः-मित्रसंप्राप्तिः-काकोलूकीयम्-लब्धप्रणाशम्-अपरीक्षितकारकम् इत्यादिप्रकरणपञ्चकोपेतो सकलार्थशास्त्रसाररूपो बालानां सुखेन नीतिशास्त्रगीर्वाणभाषाबोधकोऽयं ग्रन्थोऽस्माभिः प्रसिद्धिं नीतः । **मूल्यं १। रू., प्रे. व्य. ४ आ.**

सुभाषितरत्नसंदोहः ।

श्रीमदमितगतिविरचितः ।

अस्मिन् ग्रन्थे सांसारिकविषयनिरूपणादिसुभाषितरूपाणि सहृदयहृदयाह्लादकानि ३४ प्रकरणानि सन्ति । व्याख्यानप्रवचनकर्तृणामतीवोपयोगीति संपाद्य प्रकटीकृतः ।

मूल्यं १२ आ., प्रे. व्य. ३ आ.

म्यानेजर-निर्णयसागर प्रेस,
२६-२८, कोलभाट स्ट्रीट, मुंबई नं. २